कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः ॥
स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च ।
गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः ॥
श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो विडा-
लाक्षः ।
विप्राणामपि न शुभं करोति वृषभः परिगृहीतः ।
ये चोद्धरन्ति पादान् पङ्कादिव योजिताः कृश-
ग्रीवाः ।
कातरनयना हीनाः पृष्ठतश्च ते न भारसहाः ॥
मृदुसंहतताम्रोष्ठास्तनुस्फिजस्ताम्रतालुजिह्वाश्च ।
तनुतुङ्गह्रस्वश्रवणाः सुकुक्षयः स्पष्टजङ्घाश्च ॥
आताम्रसंहतखुरा व्यूढोरस्का बृहत्ककुद-
युक्ताः ।
स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गाः ॥
तनुभूस्पृग्वालधयो रक्तान्तविलोचना महो-
च्छ्वासाः ।
सिंहस्कन्धास्तन्वल्पकम्बलाः पूजिताः सुगताः ॥
वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः ।
शुभदा भवन्त्यनडुहो जङ्घाभिश्चैणकनिभाभिः ॥
वैदूर्य्यमल्लिका बुद्बुदेक्षणाः स्थूलनेत्रचर्म्माणः ।
पार्ष्णिभिरस्फुटिताभिः शस्ताः सर्व्वेऽपि भार-
वहाः ॥
घ्राणोद्देशे सवलिर्म्मार्ज्जारमुखः सितश्च दक्षि-
णतः ।
कमलोत्पललाक्षाभः सुवालधिर्वाजितुल्यजवः ॥
लम्बैर्वृषणैर्मेषोदरश्च सङ्क्षिप्तवङ्क्षणाक्रोडः ।
ज्ञेयो भाराध्वसहो जवेऽश्वतुल्यश्च शस्तफलः ॥
सितवर्णः पिङ्गाक्षस्ताम्रविषाणेक्षणो महा-
वक्त्रः ।
हंसो नाम शुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥
भूस्पृग्वालधिराताम्रवङ्क्षणो रक्तदृक् ककुद्मी च ।
कल्माषश्च स्वामिनमचिरात् कुरुते पतिं लक्ष्म्याः ॥
यो वासितैकचरणो यथेष्टवर्णश्च सोऽपि शस्त-
फलः ।
मिश्रफलोऽपि ग्राह्यो यदि नैकान्तप्रशस्तो-
ऽस्ति ॥” * ॥
गोरीङ्गितभेदेन शुभाशुभमुक्तं यथा, तत्रैव
९२ अध्याये,—

“गावो दीनाः पार्थिवस्याशिवाय
पादैर्भूमिं कुट्टयन्त्यश्च रोगान् ।
मृत्युं कुर्व्वन्त्यश्रुपूर्णायताक्ष्यः
पत्युर्भीतास्तस्करानारुवन्त्यः ॥
अकारणे क्रोशति चेदनर्थो
भयाय रात्रौ वृषभः शिवाय ।
भृशं निरुद्धा यदि मक्षिकाभि-
स्तदाशु वृष्टिं सरमात्मजैर्व्वा ॥
आगच्छन्त्यो वेश्म बम्भारवेण
संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः ।
आर्द्राङ्ग्यो वा हृष्टरोमण्यः प्रहृष्टा
धन्या गावः स्युर्महिष्योपि चैवम् ॥” * ॥)

गोमङ्गलत्वादि यथा, देवलः ।
“लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्च्चयेच्च यः ।
प्रदक्षिणञ्च कुर्व्वीत तथा ह्यायुर्न हीयते ॥”
अभिप्रेतार्थसिद्धिर्म्मङ्गलं तद्धेतुतया ब्राह्मणा-
द्यपि ॥ * ॥ गोप्रणामे ब्रह्मपुराणम् ।
“सदा गावः प्रणम्यास्तु मन्त्रेणानेन पार्थिव ! ।
नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ॥
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ।
मन्त्रस्य स्मरणादेव गोदानफलमाप्नुयात् ॥”
भविष्ये ।
“गामालभ्य नमस्कृत्य कृत्वा चैव प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा ॥
गवामश्वि न लङ्घेत मूत्रे गन्धेन वर्ज्जयेत् ।
यावदाघ्राति तद्गन्धं तावद्गन्धेन युज्यते ॥”
विष्णुः ।
“गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना ।
षडङ्गमेतन्मङ्गल्यं पवित्रं सर्व्वदा गवाम् ॥”
षडङ्गं षट्प्रकारम् । इति शुद्धितत्त्वम् ॥ * ॥
तन्मांसगुणाः । सुस्निग्धत्वम् । पित्तश्लेष्मविवर्द्धन-
त्वम् । बृंहणत्वम् । बलकारित्वम् । पीनसप्रदर-
नाशित्वञ्च । इति भावप्रकाशः ॥ श्रमूलत्वम् ।
गुरुत्वम् । वातकफापहत्वञ्च ॥ * ॥ तद्दुग्धगुणाः ।
पथ्यत्वम् । अत्यन्तरुच्यत्वम् । स्वादुत्वम् । स्निग्ध-
त्वम् । पित्तवातामयनाशित्वम् । मेध्यत्वम् ।
कान्तिप्रज्ञाङ्गपुष्टिवीर्य्यवृद्धिकारित्वञ्च ॥ (यथा
च हारीते प्रथमस्थानेऽष्टमाध्याये ।

“गव्यं पवित्रञ्च रसायनञ्च
पथ्यञ्च हृद्यं बलपुष्टिदं स्यात् ।
आयुःप्रदं रक्तविकारपित्त-
त्रिदोषहृद्रोगविषापहं स्यात् ॥” * ॥)

तद्दधिगुणाः । अतिपवित्रत्वम् । शीतत्वम् ।
स्निग्धत्वम् । दीपनत्वम् । बलकारित्वम् । मधुर-
त्वम् । अरोचकवातामयनाशित्वम् । ग्राहित्वञ्च ॥
(यथा च हारीते प्रथमस्थानेऽष्टमेऽध्याये ।
“अम्लस्वादुरसं ग्राहि गुर्व्वुष्णं वातरोगजित् ।
मेदः-शुक्र-बल-श्लेष्म-रक्तपित्ताग्नि-शोफकृत् ॥
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ।
वातापहं पवित्रञ्च दधि गव्यं गुणप्रदम् ॥” * ॥
तद्दुग्धफेनगुणाः ।
“गवान्तु क्षीरफेनं वा तक्रेण संहितन्तथा ।
पक्वान्नं भक्षयेद्वापि ग्रहणी तस्य नश्यति ॥”)
तन्नवनीतगुणाः । शीतत्वम् । वर्णबलशुक्रकफ-
रुचिसुखकान्तिपुष्टिकारित्वम् । सुमधुरत्वम् ।
संग्राहकत्वम् । चक्षुर्हितत्वम् । वातसर्व्वाङ्गशूल
कासश्रमसर्व्वदोषनाशित्वञ्च ॥ * ॥
तद्घृतगुणाः । हृद्यत्वम् । धीकान्तिस्मृतिबल-
मेधापुष्ट्यग्निवृद्धिशुक्रवपुःस्थैर्य्यकारित्वम् । वात-
श्लेष्मश्रमपित्तनाशित्वम् । विपाके मधुरत्वम् ।
हव्यतमत्वम् । बहुगुणत्वञ्च ॥ (तथा च ।
“विपाके मधुरं हृद्यं वातपित्तकफापहम् ।
चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तमम ॥”
इति हारीते प्रथमस्थाने अष्टमेऽध्याये ॥ * ॥)
“गवां प्रत्यूषसि क्षीरं गुरु विष्टम्भि दुर्ज्जरम् ।
तस्मादभ्युदिते सूर्य्ये यामं यामार्द्धमेव वा ॥
समुत्तार्य्य पयो ग्राह्यं तत् पथ्यं दीपनं लघु ।
विवत्सावालवत्सानां पयो दोषसमीरितम् ॥
शस्तं वत्सैकवर्णाया धवलीकृष्णयोरपि ।
इक्ष्वादा माषपर्णादा ऊर्द्ध्वशृङ्गी च या भवेत् ॥
तासां गवां हितं क्षीरं शृतं वाशृतमेव वा ।
गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ।
श्लेष्मघ्नं रक्तवर्णानां त्रीन् हन्ति कपिलापयः ॥”
इति राजनिर्घण्टः ॥

गौः, [गो] पुं, (गम्यते कर्म्मिभिः यज्ञदान-
परोपकारादिधर्म्ममूलककर्म्मफलैर्यस्मिन् । गम्
+“गमेर्डोः ।” उणां । २ । ६३ । इति अधि-
करणे डोः ।) स्वर्गः । (गम्यन्ते ज्ञायन्ते
विषया येन यद्वा गच्छति शीघ्रमिति करणे
कर्त्तरि वा डोः । किरणसम्पर्केण विना चाक्षुष-
ज्ञानाभावात् किरणस्य ज्ञानप्रकाशधर्म्मवत्त्वात्
शीघ्रगामित्वाच्च तथात्वम् ।) रश्मिः । (यथा,
महाभारते । ३ । ३ । ५२ ।
“पयोदशद्वीपवतीं गोभिर्भासयसे महीम् ।
त्रयाणामपि लोकानां हितायैकः प्रवर्त्तसे ॥” * ॥)
वज्रः । इति मेदिनी । गे । १ ॥ (गम्यते पुण्यवद्भि
र्यस्मिन् । अधिकरणे डोः । इष्टापूर्त्तादिसकाम
कर्म्मभिः पुण्यवताञ्चन्द्रलोकगमनात् तथा-
त्वम् ।) चन्द्रः । इति विश्वः ॥ (गच्छति प्राप्नोति
विश्वं प्रकाशकालकेन स्वतेजसेति जानाति
सर्व्वमिति वा । कर्त्तरि डोः ।) सूर्य्यः । गोमेध-
यज्ञः । इत्यमरटीकायां भानुदीक्षितः ॥ ऋषभ-
नामौषधम् । इति राजनिर्घण्टः ॥

गौः, [गो] स्त्री, (गम्यते विषयज्ञानं यया । गम्
+“गमेर्डोः ।” उणां । २ । ६३ । इति करणे
डोः ।) चक्षुः । (गच्छति शीघ्रमिति कर्त्तरि
डोः ।) बाणः । दिक् । (गम्यते ज्ञायते चित्ताभि-
प्रायो यया । करणे डोः ।) वाक् । (यथा,
रघुः । ५ । १२ ।

“इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य ॥” * ॥

गम्यते शस्यतेऽस्यामिति । अधिकरणे डोः ।)
भूः । (यथा, रघुः । १ । २६ ।
“दुदोह गां स यज्ञाय शस्याय मघवा दिवम् ।
सम्पद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ॥” * ॥
जले बहुवचनान्तोऽयम् । इति मेदिनी । गे । १ ॥
जले एकवचनान्तोऽपि इति केचित् । इति
भरतः ॥ (यथा, वृन्दावनयमके । २ ।

“स्वमिव मुखं गवि शीर्षं
वुपधाय स्वपिति यो भुजङ्गविशेषम् ।
नव पुष्करसमकरया
श्रीयोर्म्मिपंक्त्या च सेवितः समकरया ॥”)

माता । इत्येकाक्षरकोषः ॥ (स्वनामख्याता
शुकदौहित्रस्य ब्रह्मदत्तस्य भार्य्या । यथा, भाग-
वते । ९ । २१ । २५ ।
“स कीर्त्त्यां शुककन्यायां ब्रह्मदत्तमजीजनत् ।